Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ वैष्णवद्वादशाक्षरीविधानमुच्यते —

प्रजापति ऋषिः । गायत्री छन्दः । विष्णुर्देवता । अं बीजम् । नमश्शक्तिः । ओं हृत्, । नमश्शिरः । भगवते शिखा । वासुदेवाय कवचम् । ओं नमो भगवते वासुदेवाय अस्त्रम् ॥ ध्यानम् —

हरिमुज्ज्वलचक्रदराब्जगदाकुलदोःपरिघं सितपद्मगतम् ।
वलयाङ्गदहारकिरीटधरं नवकुन्दरुचं प्रणमामि सदा ॥

ओं नमो भगवते वासुदेवाय इति मन्त्रः ॥ मोक्षप्रधानोयं मन्त्रः । द्वादशलक्षजपः ॥

अथाक्षरन्यासं वक्ष्ये —

सपादजानुयुगललिङ्गनाभ्युदरेषु च ।
हृदोर्गळास्यदृङ्मस्तशिखास्वक्षरशो न्यसेत् ॥

इति संहारन्यासः ॥

शिखाललाटनेत्रास्यगळदोर्हृदयेष्वपि ।
सकुक्षिनाभिलिङ्गाख्यजानुपादेषु विन्यसेत् ॥

इति सृष्टिन्यासः ॥

हृत्कुक्षिनाभिषु तथा गुह्यजानुपदेष्वथ ।
करकण्ठास्यदृङ्मस्तशिखास्वूर्ध्वं च विन्यसेत् ॥

इति स्थितिन्यासः । एतस्य त्रिविधन्यासस्य च फलमुच्यते ॥

संहृतेर्दोषसंहारः सृष्टेश्च शुभपुष्टयः ।
स्थितेश्च शान्तिर्विन्यासास्तस्मात्कार्यास्त्रयो मताः ॥

शुद्धैस्तिलैर्द्वादशसहस्रं पुरश्चरणाहोमः ।

अथ पूजा —

पूर्वोक्तवैष्णवपीठे वासुदेवं समावाह्य समर्चयेत् । अङ्गैः प्रथमावृतिः । वासुदेवाय० सङ्कर्षणाय० प्रद्युम्नाय० अनिरुद्धाय० एताश्चतस्रो मूर्तयो दिक्षु । पुनः लक्ष्म्यै० सरस्वत्यै० प्रीत्यै० रत्यै० एता विदिक्षु । एतैर्द्वितीयावृतिः ॥ केशवाय० नारायणाय० माधवाय० गोविन्दाय० विष्णवे० मधुसूदनाय० त्रिविक्रमाय० वामनाय० श्रीधराय० हृषीकेशाय० पद्मनाभाय० दामोदराय० १२ एतैस्तृतीयावृतिः । इन्द्रादिभिश्चतुर्थी ॥

अथ प्रयोगः —

समिधामथ दुग्धवृक्षजानां जुहुयादर्कसहस्रकं सदुग्धम् ।
मनसः परिशुद्धये मनस्वी सघृतेनापि पयोन्धसा सितेन ॥

अस्यार्थः-- दुग्धवृक्षास्तु अश्वत्थवटोदुम्बरप्लक्षजाः (क्षाः) क्षीरसिक्तै-रेतैरर्कसहस्रं द्वादशसहस्रं जुहुयात् । सघृतेन पयोन्धसा सितेनेति । धवलीकृतेन क्षीरोदनेन घृतसिक्तेन च सहस्रं जुहुयात् । तत्फलायैवेत्यर्थः ॥